दिव्यः जाठरश्चेति भेदात्। तत्र पार्थिवकाष्ठादिप्रभवः भौमः महानसाद्यग्निः, जलवाय्वादिभवः दिव्यः विद्युदुल्कावज्रादिः। उभावपि ऊर्द्ध्वज्वलनस्वभावः। उदरे भवस्तृतीयः। त्रयोऽप्यमी स्वसंयुक्तपाकदाहप्रकाशन समर्थाः। सर्व्वेऽप्यमी लोके शास्त्रे च वह्न्यादिशब्देन व्यवह्रियन्ते तेषां विशेषगुणाः शब्दस्पर्शरूपाणि "योयोयावतिथश्चैषां स स तावद्गुणः स्मृतः" इति मनुना भूतमध्ये तृतीयस्य तेजसः त्रिगुणत्वमुक्तं व्यक्तमुक्तं महाभारते शब्दः स्पर्शश्च रूपञ्च तेजसोऽथ गुणास्त्रयः इति "अत एव "वह्नौ भगभुगध्वनिरिति" पञ्चदश्यामुक्तम् वह्नेस्तु तेजोजलभूम्यात्मकत्वेन लोहितशुक्लरूपत्वम् अत एव छान्दोग्ये त्रिवृत्करणानन्तरम् वह्नेस्त्रिरूपत्वमुक्तं यथा "यदग्नेः रोहितं रूपं तेजसस्तद्रूपं, यच्छुक्लं तदपां, यत् कृष्णं तदन्नस्येति" विवृतञ्चैतद्भाष्यकृता "यस्य देवतानां त्रिवृत्करणमुक्तं तस्यैवोदाहरणमुच्यते। उदाहरणं नामैकदेशप्रसिद्ध्याशेषप्रसिद्ध्यर्थमुदाह्रियत इति। तदेतदाह यदग्नेः त्रिवृत्कृतस्य रोहितं रूपं प्रसिद्धं लोके तदत्रिवृत्कृतस्य तेजसो रूपमिति विद्धि। तथा यच्छुक्लं रूपमग्नेः तदपामत्रिवृत्कृतानामेव यत् कृष्णं तस्यैवाग्नेः रूपं तदन्नस्य पृथिव्या अत्रिवृत्कृतताया इति विद्धीति"। अत एव तत्तच्छास्त्रकाव्यादिषु वह्नेररुणरूपतया वर्णनं दृश्यते। अग्निमूर्त्तिध्याने च अरुणरूपत्वमनुपदं दर्शयिष्यते। लोके चारुणत्वेनैव प्रत्यक्षेणासावुपलभ्यते एवञ्च नैयायिकोक्तं तेजसः शुक्लभास्वररूपत्वं प्रत्यक्षवेदविरुद्धत्वादुपेक्ष्यमेव। तत्र भौमदिव्ययोः प्रायशो लोकसिद्धत्वेन दिव्यस्याग्रे दिव्यशब्दे वक्ष्यमाणत्वाच्च जाठरे वह्नौ विशेषोऽभिधीयते। "नाभेरूर्द्ध्वं हृदयादधस्तादामाशयमाचक्षते तद्गतं सौरं तेजः पित्तमित्याचक्षते" इति भाष्यविवरणे आनन्दगिरिः वैद्यकवचनत्वेनोवाच। अत एव तस्य कौक्षेय इति संज्ञा। छान्दोग्ये च "या हृदयस्य नाड्यस्ताः पिङ्गलस्याणिम्नस्तिष्ठन्ति शुक्लस्य नीलस्य पीतस्य लोहितस्येत्यसौ वा आदित्यः पिङ्गलः एष शुक्ल एष नील एष पीत एष लोहित इति"। व्याख्यातञ्चैतत् भाष्यकृता। "अथ या एता वक्ष्यमाणा हृदयस्य पुण्डरीकाकारस्य ब्रह्मोपासनस्थानस्य सम्बन्धिन्यो नाड्यो हृदयमांसपिण्डात्सर्व्वतो विनिःसृता आदित्यमण्डलादिरश्मयस्ताश्चैताः पिङ्गलस्य वर्णविशेषविशिष्टस्याणिम्नः सूक्ष्मरसस्य रसेन पूर्णास्तदाकारा एव तिष्ठन्ति वर्त्तन्त इत्यर्थः। तथा शुक्लस्य नीलस्य पीतस्य लोहितस्य च रसस्य पूर्णा इति सर्व्वत्राध्याहार्य्यम्। सौरेण तेजसा पित्ताख्येन पाकाभिनिर्वृत्तेन कफेनाल्पेन सम्पर्कात्पिङ्गलं भवति, सौरं तेजः पित्ताख्यम्। तदेव वातभूयस्त्वान्नीलं भवति। तदेव च कफभूयस्त्वाच्छुक्लं, कफेन समतायां पित्तम्, शोणितबाहुल्येन लोहितम्। वैद्यकाद्वा वर्णविशेषा अन्वेष्टव्याः। कथं भवतीति? श्रुतिस्त्वाहादित्यसम्बन्धादेव, तत्तेजसो नाडीष्वनुगतस्यैते वर्णविशेषा" इति। कथमसौ वाऽदित्यः पिङ्गलो"? वर्णत एष आदित्यः शुक्लोऽप्येष नील एष पीत एष लोहित आदित्य एव, तस्य चान्नरसस्य धात्वन्तरसम्पर्कवशात् वर्णविशेष" इत्यानन्दगिरिः। अस्यैव जाठरस्य पिपासाहेतुत्वं छान्दोग्ये उक्तं यथा "अथ यत्रैतत् पुरुषः पिपासति नाम तेज एव तत् पीतं नयते इति"। व्याख्यातञ्च भाष्यकृता द्रवकृतस्याशितस्यान्नस्य नेतारः आपोऽन्नशुङ्गं देहं क्लेदयन्त्यः शिथिलीकुर्य्युः अब्बाहुल्यात्, यदि तेजसा न शोष्येत। नितराञ्च तेजसा शोष्यमाणास्वप्सु देहभावेन परिणममानासु पातुमिच्छा पिपासा पुरुषस्य जायते तदा "पुरुषः पिपासति नाम, तदेतदाह "तेज एव तत्तदा पीतमबादि शोषयत् देहलोहितादिभावेन नयते परिणमयतीति"। तस्य रसपाकप्रकारमाह योगार्णवे। "आयुष्यं भुक्तमाहारं स वायुः कुरुते द्विधा संप्रविश्यान्नमध्यन्तु, पृथक् किट्टं पृथग् जलम् (किट्टम् अन्नमलभेदम्)। अग्नेरूर्द्ध्वं च संस्थाप्य तदन्नं च जलोपरि। जलस्याधः स्वयं प्राणः स्थित्वाग्निं धमते शनैः (धमते संधुक्षयति) वायुना ध्मायमानोऽग्निरत्युष्णं कुरुते जलम्। अन्नं तदुष्णतोयेन समन्तात् पच्यते पुनः। द्विधा भवति तत् पक्वं पृथक् किट्टं पृथग् रसम्। रसेन तेन ता नाडीः प्राणः पूरयते पुनः। प्रत्यर्पयन्ति सम्पूर्णारसानि ताः समन्तत इति"। एवं रसपाकोत्तरं धातुपाकोऽभिहितः पदार्थादर्शे। यथा "त्वगसृग्मांसमेदोऽस्थिमज्जशुक्राणि धातवः। सप्त स्युस्तत्र चोक्ता त्वक् रक्तजोदरवह्निना। पक्वाद्भवेदन्नरसादेवं रक्तादिभिस्तथा। स्वस्वकोशाग्निना पाकात् प्रजायन्ते त्वगादय इति"। एतन्मूलमेव "तस्य षोढा शरीराणि षट् त्वचो धारयन्ति चेति" याज्ञवल्क्यवचनव्याख्यायां मिताक्षराकृता स्पष्टमुक्तम् यथा तस्यात्मनोयानि जरायुजाण्डजादीनि शरीराणि तानि प्रत्येकं षट्प्रकाराणि रक्तादिषड्धातुपरिपाकहेतुभूतषडग्निस्थानयोगित्वेन। तथाहि अन्नरसो जाठरवह्निना पच्यमानो रक्ततां प्रतिपद्यते, रक्तः स्वकोश-